Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 22

No. of Printed Pages – 7

P–95–Sanskritam - II (Supp.)

# प्रवेशिका पूरक परीक्षा, 2024

# PRAVESHIKA SUPPLEMENTARY EXAMINATION, 2024

## संस्कृतम्

## (द्वितीय – प्रश्नपत्रम्)

समय : 3:15 सपादहोरात्रयम्

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्य–निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव लेख्यम्।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम्।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

## खण्ड – अ

1) वस्तुनिष्ठ प्रश्ना: [15×1=15]

i) अमेध्यं भोजनं कीदृशम् उच्यते? [1]

अ) ब्राह्मण प्रियम्  ब) सात्विक प्रियम्

स) तामस प्रियम्  द) राजस प्रियम्

ii) पुत्र: पितरं कै: प्रीणयेत्? [1]

अ) सुचरितै:  ब) आहारै:

स) मित्रै:  द) कुचरितै:

iii) अभिषेकं परित्यज्य राम: किम् आश्रयेत्? [1]

अ) जटाचीरधरो भव  ब) पितृसेवापरायणो भव

स) रत्नाभूषणधरो भव  द) दिव्याम्बरधरो भव

iv) लोके कीदृश: मानव: श्लाघ्यतम:? [1]

अ) धनी  ब) विवेकी

स) दानी  द) शक्तिशाली

v) गुरूदक्षिणायां वरतन्तु: कियद्धनमानेतुं कौत्सम् आदिष्टवान्? [1]

अ) द्वादशकोटीम्  ब) दशकोटीम्

स) नवकोटीम्  द) चतुर्दशकोटीम्

vi) पञ्चतन्त्रस्य तृतीयतन्त्रस्य नाम किम्? [1]

अ) लब्धप्रणाशम्  ब) अपरीक्षितकारकम्

स) मित्रसम्प्राप्ति:  द) काकोलुकीयम्

vii) सङ्कट विकटौ कौ? [1]

अ) शशकौ  ब) हंसौ

स) वायसौ  द) कच्छपौ

viii) ताम्रचूड: भिक्षापात्रं केन ताडयति स्म? [1]

अ) नागदन्तेन ब) जर्जरहस्तेन

स) जर्जरवंशेन द) जर्जरप्रस्तरेण

ix) स्वर्णहंसकथायां राज्ञ: नाम आसीत् – [1]

अ) चित्ररथ: ब) देवव्रत:

स) देवदत्त: द) चित्रभानु:

x) ''ममायं तृतीय: पुत्रो भविष्यति।'' इति केन उक्तम्? [1]

अ) श्रृगाल्या ब) गजेन

स) सिंह्या द) सिंहेन

xi) शतबुद्धि: कुत्र स्थित:? [1]

अ) पादयो: ब) हृदये

स) शिरसि द) हस्तयो:

xii) लताशब्दस्य चतुर्थीविभक्ति एकवचनस्य रूपमस्ति। [1]

अ) लतायाम् ब) लताम्

स) लतया द) लतायै

xiii) ''पति'' शब्दोऽस्ति। [1]

अ) इकारान्तपुल्लिंङ्गशब्द: ब) अकारान्तपुल्लिंङ्गशब्द:

स) नकारान्तपुल्लिंङ्गशब्द: द) इकारान्तस्त्रीलिंङ्गशब्द:

xiv) नृत् धातो: लट्लकार प्रथमपुरूषस्य बहुवचने रूपमस्ति। [1]

अ) नृत्यन्ति ब) नर्तिष्यन्ति

स) नृत्यन्तु द) नृत्येयु:

xv) निम्नलिखितेषु आत्मनेपदिधातु: अस्ति। [1]

अ) वद् ब) अस्

स) क्रीड् द) लभ्

**2)** रिक्तस्थानानि पूरयत – **[7×1=7]**

i) ................ श्रेष्ठस्तत्तदेवेतरो जनः। **[1]**

ii) नानाफलं फलति ................ भूमिः। **[1]**

iii) तत्र मे याचितो राजा .................. । **[1]**

iv) अकृत्यं नैव कर्त्तव्यं .................... ऽप्युपस्थिते। **[1]**

v) सूर्याश्वैर्मसजस्तताः सगुरवः ...................। **[1]**

vi) तद्रूपकमभेदो य .....................। **[1]**

vii) नामलिङ्गानुशासनम् ...................... अपरं नाम अस्ति। **[1]**

**3)** अतिलघूत्तरात्मकाः प्रश्नाः **[10×1=10]**

i) सर्वेगुणाः किम् आश्रयन्ते? **[1]**

ii) आत्मानं कः न शोषयति? **[1]**

iii) सेवकः यदि प्रवचनपटुः भवति तदा तं किं कथ्यते? **[1]**

iv) रघुः कस्मिन् यज्ञे स्वकीयं सर्वस्वं याचकेभ्यः अयच्छत्? **[1]**

v) कम्बुग्रीवः कः? **[1]**

vi) पञ्चतन्त्रस्य द्वितीयतन्त्रस्य किं नाम वर्तते? **[1]**

vii) तीर्थयात्राप्रसङ्गेन कः समायातः? **[1]**

viii) पद्मसरे जाम्बूनदमयाः के तिष्ठन्ति? **[1]**

ix) मत्स्ययोः मैत्री केन सह अभवत्? **[1]**

x) सिंहः सिंह्यै दंष्ट्रामध्यगतं कृत्वा किं समर्पितवान्? **[1]**

## खण्ड – ब

[12×2=24]

4) नरकस्य द्वारं कतिविधम्? नामानि लिखत। [2]

5) रामः प्रसन्नोभूत्वा भरताय किं दातुमभिलषति? [2]

6) कस्य भूतार्थाः नश्यन्ति? [2]

7) सहस्रबुद्धिः प्रहस्य किमाह? [2]

8) मन्दाक्रान्ता छन्दसः लक्षणं लिखत। [2]

9) शिखरिणी–छन्दसः उदाहरणं लिखत। [2]

10) उपमालङ्कारस्य लक्षणं लिखत। [2]

11) नवपलाश–पलाशवनं पुरः [2]
स्फुटपराग परागतपङ्कजम्। इत्यत्र कः अलङ्कारः?

12) अमरकोषानुसारं ब्रह्मणः नामद्वयं लिखत। [2]

13) अमरकोषानुसारं शिवस्य नामद्वयं लिखत। [2]

14) मातृशब्दस्य तृतीया विभक्तेः रूपाणि लिखत। [2]

15) अस्‌धातोः लङ्‌लकार–प्रथम पुरूषस्य रूपाणि लिखत। [2]

## खण्ड – स

[4×3=12]

16) अधोलिखितयोः द्वयोः श्लोकयोः एकस्य सप्रसङ्गं–व्याख्या कार्या – [1+2=3]

(क) आरम्भगुर्वी क्षयिणी क्रमेण,
लघ्वी पुरावृद्धिमुपैति पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना,
छायेव मैत्री खलसज्जनानाम्।।

(ख) न जायते म्रियतेवा कदाचित्
न्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो,
न हन्यते हन्यमाने शरीरे।।

17) अधोलिखितयोः श्लोकयोः एकस्य सप्रसङ्गं–व्याख्या लेखनीया – [1+2=3]

(क) तद् ब्रूहि वचनं देवि राज्ञो यदभिकांक्षितम्।
करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते।।

(ख) जनस्य साकेत निवासिनस्तौ,
द्वावप्य भूतामभिनन्द्यसत्वौ।
गुरूप्रदेयाधिकनिः स्पृहोऽर्थी,
नृपोऽर्थिकामादधिकप्रदश्च।।

18) अधोलिखितयोः श्लोकयोः एकस्य सप्रसङ्गं भावार्थः लेख्यः। [1+2=3]

(क) सम्पत्सु महतां चित्तं भवे दुत्पलकोमलम्।
आपत्सु च महाशैल शिलासंघात कर्कशम्।।

(ख) स्थाने भवानेकनराधिपः सन्,
अकिञ्चनत्वं मखजं व्यनक्ति।
पर्यायपीतस्य सुरैर्हिमांशोः,
कलाक्षयः श्लाघ्यतरो हि वृद्धेः।।

19) भवती रागिनी, राजकीय–प्रवेशिका–संस्कृत–विद्यालयः महादेवनगरस्य छात्रा स्वभगिन्याः विवाहकारणेन दिनत्रयस्य अवकाशाय प्रधानाध्यापकाय प्रार्थनापत्रं लिखतु। [3]

अथवा

भवतः नगरपालिकाध्यक्षाय नगरे स्वच्छता व्यवस्थायै प्रार्थनापत्रं लिखतु।

## खण्ड – द

**[3×4=12]**

**20)** अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या – **[1+3=4]**

(क) अथाऽसावभ्यागतः परं कोपमुपागतस्तमुवाच–भोस्ताम्रचूड! परिजातस्त्वं सम्यङ्नसुहृत्। तेन मया सह साह्लादं न जल्पसि। तदेकमठप्राप्त्याऽपित्वेगर्वितः, व्यक्तः सुहृत्स्नेहः, नैतद्वेत्सि यत्त्वया मठाश्रयव्याजेन नरकोपार्जनं कृतम्।

(ख) अथतौ द्वावपि भ्रातरौ गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठ भ्रातृचेष्टितमूचतुः यथा–''गजं दृष्ट्वा दूरतोऽपि प्रनष्टः।'' सोऽपि तदाकर्ण्य कोपाविष्टमनाः प्रस्फुटिता–ऽधरपल्लवस्ताम्रलोचनः त्रिशिखां भृकुटिंकृत्वा तौ निर्भर्त्सयन् परूषतरवचनान्युवाच।

**21)** एकस्याः कथायाः सारांशः संस्कृतभाषायां लेखनीयः। **[4]**

(क) स्वर्णहंस–स्वर्ण पक्षिराज कथा।

(ख) काष्ठभ्रष्ट कच्छप कथा।

**22)** कमप्येकं विषयमवलम्ब्य निबन्धं लिखत। **[4]**

(क) श्रीरामः

(ख) अहिंसा परमो धर्मः

(ग) संस्कृत दिवसः

DO NOT WRITE ANYTHING HERE